# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

# संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

उपविषयः- अच्सन्धिप्रकरणम् (खण्ड-ग)

डॉ. श्याम कुमार झा
सह- आचार्यः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

पदसाधनम्

(लघुसिद्धान्तकौमुदी)

अच्सन्धिप्रकरणम्

# कृष्णौकत्वम्

कृष्ण+एकत्वम्

कृष्ण् ऐ कत्वम् 'वृद्धिरेचि' इति सूत्रेण अकार-एकारयोः ऐकारैकादेशे

कृष्णौकत्वम् पदसिद्धम्।

# गङ्गौघः

गङ्गा ओघः

गङ् औ घः ‘वृद्धिरेचि’ इति सूत्रेण आकार-ओकारयोः औकारैकादेशे

गङ्गौघः पदसिद्धम्।

# देवैश्वर्यम्

देव ऐश्वर्यम्

देव् ऐ श्वर्यम् ‘वृद्धिरेचि’ इति सूत्रेण अकार-ऐकारयोः ऐकार इति वृद्धिरेकादेशे

देवैश्वर्यम् पदसिद्धम् ।

# कृष्णौत्कण्ठ्यम्

कृष्ण औत्कण्ठ्यम्

कृष्ण् औ त्कण्ठ्यम् ‘आद गुणः’ इति सूत्रेण गुणप्राप्ते ‘वृद्धिरेचि’ इति सूत्रेण अकार-औकारयोः औकार इति वृद्धिरेकादेशे

कृष्णौत्कण्ठ्यम् पदसिद्धम्।

# उपैति

उप एति

उप् ऐ ति — 'एङि पररूपम्' इति सूत्रेण गुणप्राप्ते 'एत्येधत्यूठ्सु' इति सूत्रेण अकार एकारयोः ऐकार इति वृद्धिरेकादेशे

उपैति — पदसिद्धम्।

# उपैधते

उप एधते

उप् ऐ धते ‘एङि पररूपम्’ इति सूत्रेण गुणप्राप्ते

‘एत्येधत्यूठ्सु’ इति सूत्रेण अकार-एकारयोः ऐकार वृद्धिरेकादेशे

उपैधते पदसिद्धम्।

# प्रष्ठौहः

प्रष्ठ ऊहः

प्रष्ठ् औ हः ‘आद् गुणः’ इति सुत्रेण गुणप्राप्ते

‘एत्येधत्यूठ्सु’ इति सूत्रेण अकार-ऊकारयोः

औकार इति वृद्धिरेकादेशे

प्रष्ठौहः पदसिद्धम् ।

# उपेतः

उप इतः

उप् ए तः 'आद् गुणः' इति सूत्रेण अकार-इकारयोः एकार गुणैकादेशे

उपेतः पदसिद्धम्।

# प्रौहः

प्र ऊहः

प्र् औ हः 'आद् गुणः' इति सूत्रेण गुणप्राप्ते 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन अकार-ऊकारयोः वृद्धिरेकादेशे

प्रौहः पदसिद्धम् ।

# प्रौढिः

प्र ऊढिः

प्र् औ ढिः — 'आद् गुणः' इति सूत्रेण गुणप्राप्ते 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन अकार-ऊकारयोः औकारः इति वृद्धिरेकादेशे

प्रौढिः — पदसिद्धम्।

# धन्यवादः